## रामकृष्णमिशन्-विवेकानन्द-विश्वविद्यालयः

(भारतसर्वकारेण विश्वविद्यालयानुदानायोगस्य १९५६-धारायास्तृतीयानुभागेन मानितविश्वविद्यालयत्वेन उद्घोषितः)



# संस्कृताध्ययनविभागः

श्रीमद्विवेकानन्दस्वामिपादानां शैक्षिकदर्शनम् अनुष्ठातुं यतमान एष विश्वविद्यालयः २००५ क्रिस्ताब्दे जुलै-मासि प्रतिष्ठापितः। अध्यात्मशीलं प्राच्यं विज्ञानक्रियापरं पाश्चात्त्यं चेत्यनयोः श्रेष्ठांशान् संयोज्य "जीवनविधायकम्, पुरुषनिर्मापकम्, शीलसंवर्धकं" शिक्षणं प्रदातुम् अयं चेष्टते। भारतस्य सांस्कृतिकवैभवम् आध्यात्मिकसौभगं च पाश्चात्त्यानां वैज्ञानिकदृष्ट्या, क्रियाकौशलेन, सङ्घशक्त्या च समुचितं सम्मेल्य सर्वोच्चा शिक्षणपद्धतिः आविष्करणीया इत्यासीत् स्वामिनां प्रेक्षा। लक्ष्यमिदं कार्योपलक्षितं कर्तुं बद्धपरिकरः संस्कृतविभागः शैक्षणिकप्रकल्पैः तदनुकूलक्रिया-कलापैश्च प्रयतते। भारतीयपरम्पराध्ययन-शालायाम् (School of Indian Heritage इत्यत्र) अन्तर्गतः अयं संस्कृताध्ययनविभागः प्राच्यपाश्चात्त्ययोः सर्वोच्चगुणान् युवजनेषु विकासयितुं श्राम्यति।

## दिग्दर्शनं स्फूर्तिस्थानं च (Complete Works of Swami Vivekananda ग्रन्थाद् अनूदितवचांसि)

**वयमेतत् साधयाम** “साम्यम्, स्वातन्त्र्यम्, उद्यमः, बलम् इत्येतेषु सत्त्वतः पाश्चात्त्यानां पाश्चात्त्याः भवन्तः तत्समकालमेव धर्मनिष्ठासु धार्मिकप्रवृत्तौ च तत्त्वतः भारतीयाः भवितुं प्रभवन्ति वा? इदं करणीयम्, वयमेतत् साधयाम च।” [Vol 5, page 29-30]

**संप्रति इदम् इष्यते** “वयं वाञ्छामः पाश्चात्त्यविज्ञानेन सहभावापन्नं वेदान्तम्, ध्येयमन्त्रत्वेन ब्रह्मचर्यम्, श्रद्धाम्, आत्मविश्वासं च।” [Vol 5, page 366]

**तेजस्विनी संस्कृतभाषा** “ममेयं मनीषा यत् आदौ अस्माकं ग्रन्थेषु निहितानि आध्यात्मिक-रत्नानि प्रकाशं नेयानि... इमानि सर्वेषां सम्पदः स्युः...! अत्र विघ्नायते संस्कृतभाषा - इयम् अस्मदीया ऐश्वर्यमयी वाणी। एषा अर्गला तावन्न शक्यवारणा यावन्न राष्ट्रं संस्कृतपण्डितैः पूर्णम्।...अतः जनभाषया तत्त्वं बोधनीयम्, तेन सह संस्कृतभाषा अपि अवश्यं शिक्षणीया, यतो हि संस्कृत-शब्दानां ध्वनि-मात्रमपि जनेषु आदधाति गौरवं, बलं, तेजश्च।” [ibid.,3.289-90]



मेधाभवनम्, विश्वविद्यालयस्य बेलुडमुख्यपरिसरे



## पाठ्यक्रमः

- **समन्वित-एम्.ए.**(१० सत्राणि, स्नातके वर्षत्रयम् + स्नातकोत्तरे वर्षद्वयम्)
- **विशिष्टाचार्यः** (एम्.फिल्.) (३-सत्राणि)
- **विद्यावारिधिः** (पि.एच्.डि.) (६-१० सत्राणि)
- **व्यावहारिकसंस्कृतम्** – सार्वजनीनं चतुर्मासात्मकं साप्ताहिकं क्रेडिट्-त्रयात्मकं संस्कृत-भाषा-शिक्षणम्। पाठ्यक्रमे अस्मिन् विद्यन्ते त्रयः स्तराः -

  प्राथमिकशिक्षा - वर्णमाला, वाक्यरचना, सम्भाषणसंस्कृतं च अस्यां पाठ्यन्ते

  माध्यमिकशिक्षा - व्याकरणप्रवेशः, अर्थसहित-गीतोपनिषत्पाठश्च अत्र विषयाः

  उच्चशिक्षा - प्रगतव्याकरणम्, चिताः साहित्यभागाः, प्रबन्धलेखनं चात्र बोध्याः

## आवेदनयोग्यता

- **समन्वित-एम्.ए.**-उच्चमाध्यमिकस्तरे तत्समपरीक्षायां वा साकल्येन न्यूनतः ६५% अङ्काः (SC/ST- आवेदकानां ५% अवसर्गः)। अनधीतसंस्कृता अपि आवेदयन्तु। प्रवेशः मे-जून्मासयोः
- **एम्.फिल्.-पि.एच्.डि** – यु.जि.सि-अनुमोदितविश्वविद्यालयतः स्नातके संस्कृतपत्रेषु, स्नातकोत्तरे विशिष्टपत्रेषु च न्यूनतः ६५% अवश्यं स्यात्। (SC/ST-आवेदकानां ५% अवसर्गः।) यु.जि.सि-NET-JRF-प्राप्तवन्तः एव स्वीक्रियन्ते। प्रवेशप्रक्रिया जुलैमासि भवति
- **व्यावहारिकसंस्कृतम्** – वयोमितिः नास्ति। उच्चमाध्यमिकशिक्षां (HS) प्राप्तवान् यः कोऽपि जनः आवेदयितुं शक्नोति। प्रवेशः जनवरिमासि जुलैमासि च भवति

## प्रकाशनानि

- **प्रज्ञालोकः**(ISSN 2320 5911) – विभागीयाध्यापकैः सम्पादिता वार्षिकी द्वैभाषिकी (संस्कृत-आङ्ग्ल-भाषात्मिका) विषयज्ञैः परिशीलिता (peer-reviewed) शोधपत्रिका
- **प्रतिभालोकः** – छात्रैः छात्राणां कृते सम्पादिता वार्षिकी संस्कृतपत्रिका
- **विवेकभास्करः** – छात्रैः सम्पादिता त्रैमासिकी भित्तिपत्रिका
- **दीपशिखा** – शोधच्छात्रैः सम्पादिता त्रैमासिकी संस्कृत-ई-पत्रिका
- **अर्थसङ्ग्रहः** – वङ्गानुवादसहितः विवृतिनामकवङ्गव्याख्यासंवलितः ग्रन्थः (१३६ पृष्ठानि, रु.१००/-)
- **मोक्षसाधनसूत्रसङ्ग्रहः** –पातञ्जलयोगसूत्र-ब्रह्मसूत्र-प्रभृतीनां मूलग्रन्थसङ्ग्रहः (७२ पृष्ठानि, रु.३०/-)

# विशेषद्रष्टव्यानि



- नवयुगोचिता गुरुकुलपद्धतिः, शीलसंवर्धनः पुरुषनिर्मापकः परिसरः
- सङ्गणकवर्गः, सहजभाषाविश्लेषणवर्गश्च (Natural Language Processing)



प्रार्थनारताः छात्राः

- संस्कृतमाध्यमेन संस्कृतशिक्षणम्
- भारतस्य समृद्धसंस्कृतिं युवसु आधातुम् "आध्यात्मिकपरम्परा"-वर्गः
- वेदघोषः, गीतोपनिषत्पाठश्च
- UGC-NET- परीक्षायै प्रशिक्षणम्



सङ्गणकवर्गः

- सुष्ठु व्यवस्थापिते छात्रावासे अनुशासनयुता औचित्यपूर्णा दिनचर्या
- विश्वविद्यालयानुदानायोगेन प्रशस्ता ऐच्छिक-क्रेडिट्-पद्धतिः (UGC recommended choice-based-credit System)



वेदपाठः

- पाणिनीयव्याकरणम् अद्वैतवेदान्तश्च विशिष्टपत्रे
- आङ्ग्लं हिन्दी च अवश्यपाठ्यविषयौ
- विशिष्टपत्राध्ययनम् आ स्नातकतृतीयात् स्नातकोत्तरान्तं यावत्



कराटे-शिक्षणम्

- योगाभ्यास-कराटे-इत्यादिना शरीरसौष्ठवं मनोविकासश्च
- मानसोल्लासिन्यां साप्ताहिक-परिषदि गान-भाषण-अभिनयादिभिः प्रतिभाविकासः



महिलानां विभागः

- पत्रिकादिप्रकाशनेन तरुणलेखकानां प्रोत्साहप्रदानम्
- प्रायेण सर्वेषां छात्राणाम् आर्थिकसाहाय्यं निःशुल्का वासव्यवस्था च
- महिलानां कृते पृथक् व्यवस्था
- विभागीयग्रन्थागारः केन्द्रीयग्रन्थागारात् पृथक् सन् शोधच्छात्राणाम् अध्यापकानां च अधिकसौकर्याय कल्पते



मानसोल्लासिनी

- **वृत्तिलाभः** - पश्चिमवङ्गसर्वकारेण कालेज्-सर्विस्-कमिशन् (CSC) पब्लिक्-सर्विस्-कमिशन् (PSC) इत्यादौ चिताः भूत्वा महाविद्यालयेषु विश्वविद्यालयेषु च सहाध्यापकपदे नियुक्ताः भवन्ति



## सम्पर्कसूत्रम्




- सङ्केतः-विभागाध्यक्षः, संस्कृताध्ययनविभागः, प्रकोष्ठसंख्या ३१०
  प्रज्ञाभवनम्, रामकृष्णमिशन्-विवेकानन्द-विश्वविद्यालयः,
  बेलुडमठः, हावडा ७११२०२
- दूरवाणी-(०३३) २६५४९९९९ चलदूरभाषा– ८२३०८६४२३८
- फ्यैक्स्-(०३३) २६५४ ४६४० ईपत्र-सङ्केतः sanskrit@rkmvu.ac.in
- जालपुटम्-sanskrit.rkmvu.ac.in


## निवेदनम्

उदारमनसां संस्कृतानुरागिणां भारतीयसंस्कृतिप्रेमिणां च अनुदानं काङ्क्षति अयं संस्कृतविभागः। विद्यायज्ञेऽस्मिन् भागग्रहणाय स्वागतं व्याह्रियते। स्यादित्थं भागग्रहणप्रकारः-

- शिक्षणस्य छात्रावासस्य च व्ययं वहन्तु। (प्रतिमासं प्रतिच्छात्रं रु. ३०००/-)
- प्रियजनस्य स्मृतौ स्थायिनिधिं निदधतु
- मुद्रणादीनां व्ययं पूरयन्तु
- पुस्तकादीनां क्रयणे साहाय्यम् आचरन्तु
- गोष्ठी-कर्मशाला-यात्रादीनां व्ययं भरन्तु



प्रज्ञाभवनम्, विश्वविद्यालयस्य बेलुडमुख्यपरिसरे

- सेवाव्रतिरूपेण श्रमदानं कुर्वन्तु- स्वकीयं समयं कौशलं च समर्पयन्तु (तद्यथा- जालपुटकार्यम्, तन्त्रांशसमस्या-समाधानम्, सम्पादनादि-प्रकाशनकर्म इत्येवमादिषु सहयोगं यच्छन्तु)
- स्पर्धासु पुरस्कारवितरणार्थं धनादिकं प्रदाय युवजनेषु प्रतिभां पोषयन्तु
- द्रव्याणि वा ददतु (पुस्तक-लेखनी-और्णेयकवस्त्रादीनि प्रापयन्तु)

★ **e-transfer करणाय वित्तकोशसम्बद्धानि तथ्यानि**

Name of Beneficiary: Ramakrishna Mission Vivekananda University
Beneficiary A/C No: 0365010090689
Bank Name: United Bank of India
Branch: Belur Math, Branch Code: BEM958
IFSC/RTGS/NEFT Code: UTBI0BEM958
MICR Code: 700027017

दत्तं धनं १००% आयकरविमुक्तं भवति 80G (2)(a)(iiif) आयकरनियमेन।

चेक्/डिडि/एमो "Ramakrishna Mission Vivekananda University" इति नाम्नि भवेत्।